# पाणिनेरष्टाध्याय्यामधिकारसूत्राणां गङ्गोत्री

Kalindi Harikrishna Pathak
Department of Sanskrit, S.V. Arts College, Ahmedabad

अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणा इति परिभाषावचनेन ज्ञायते यत्पाणिनिना लाघवेन वैदिकलौकिकभाषयोः व्याकरणम् उपदिष्टम् । लाघवसिद्ध्यर्थं पाणिनिः नानाप्रयुक्तीः प्रयुङ्क्ते । तद्यथा—उत्सर्गापवादरीतिः, बलाबलभावः, इत्संज्ञा, प्रत्याहारः, अनुवृत्तिः गणपाठः एवं धातुपाठस्योपदेशः, षड्विधानि च सूत्राणि इति नैकाः युक्तयः ।

पाणिनिरष्टाध्याय्यां षड्विधैः सूत्रैर्या तान्त्रिकीव्यवस्थाम् उद्भावयति, तया व्याकरणस्य प्रवृत्तिर्लाघवेन सारल्येन च भवति ।भाष्यकारस्य कतिपयैर्वचनैस् तु ज्ञायते पाणिनिर् अनेकाः प्रयुक्तीर्लोकादेव स्वीकृतवानिति । एवं चान्यासु प्रयुक्तिषु पूर्वाचार्याणाम् प्रभावो वर्तते । पूर्वमीमांसायां यानि विधिनियमपरिसंख्यावचनानि सन्ति तेषां विभावनापि पाणिनीयसूत्रेषु दृश्यत इति पूर्वैर्विद्वद्भिः चर्चितः । परन्तु, अधिकारसूत्राणां विभावनां पाणिनिः कुतः प्राप्तवान् इत्येषा जिज्ञासा वर्तते । तस्याः शमनार्थं पाणिनेः पूर्ववैयाकरणाः के इत्यपि ज्ञातव्यम् भवति ।व्याकरणस्य सुव्यवस्थिता विचारणा सर्वप्रथमं प्रातिशाख्यग्रन्थेषु दृश्यते । तत्र वैदिकव्याकरणसम्बन्धिनः एव विषया वर्णिताः ।परन्तु, तत्रापि सन्ति काचिद् प्रयुक्तयः । उपलब्धेषु प्रातिशाख्यग्रन्थेषु ऋग्वेदप्रातिशाख्यम्प्राचीनतमम् ।तत्र संहिता विविधाः सन्धयः, नतिः, क्रमपाठः, उच्चारणप्रकाराः, उच्चारणदोषाः, छन्दांसि इत्यादयः अनेके विषयाः सूक्ष्मतया वर्णिताः । अत्र सर्वप्रथमे व्याकरणग्रन्थे शौनकः अनेकाः प्रयुक्तीः प्रयुङ्क्ते तथा च वैज्ञानिकरीत्यैव व्याकरणस्योपदेशं करोति ।

पाणिनीयाधिकारसूत्राणां विभावना संभवतः ऋग्वेदप्रातिशाख्यात् समुद्भूता स्यादिति ऋग्वेदप्रातिशाख्यस्य परीक्षया प्रतीयते । ऋग्वेदप्रातिशाख्यस्य "प्रायोऽर्थो वृत्तम् इत्येते पादज्ञानस्य हेतवः" (१७।२५) इति सूत्रं दृष्ट्वा अनुमीयते यदधिकारस्य विभावना पाणिनिना प्रातिशाख्याद् गृहीता स्यात् । वेदमन्त्रेषु पादज्ञानं कथं कर्तव्यमिति निर्णेतुं सूक्तारम्भे निर्दिष्टदेवतायाः छन्दसः वा अधिकारस्य ज्ञानं परममावश्यकमिति शौनको निवेदयति । अस्मात्सूत्रादधिकारस्य पादपर्यन्तानुवृत्तिः प्रचलति प्रचाल्यते वा इति संभवतः पाणिनिना विमृष्टं स्यादिति मे मतिः ।अस्य विचारस्य विस्तारोऽस्मिन् शोधपत्रे भविष्यति ।